स्व. श्री बलराम स्वामी न्यायाचार्य विरचिता श्रीगुरुविंशतिका

# तस्मै श्री गुरवे नमः

**प्रस्तोता : डॉ. दयाराम स्वामी**
एम.बी.बी.एस. एम.डी. (स्वर्णपदक)
वरिष्ठ मानसिक-रोग-विशेषज्ञ एवं पूर्व प्रमुख विशेषज्ञ, एस.एम.एस. हॉस्पिटल, जयपुर
सदस्य - संचालन समिति, श्री दादू महाविद्यालय, जयपुर

संसारे खलु मानवो हि कथितः सर्वोत्तमः प्राणिनां,
तस्येदं सकलोत्तमत्वमिह यत् ज्ञानं हि तत्कारणम् ।
ज्ञानं चेत् समुपार्जितं तदमुना सोऽयं मनुष्यो भवेत्,
नो चेद् मानवदेहवानपि पशुः स्यादेष वै सर्वथा ।।1।।

ज्ञानं नैव नु मन्यते किमपि यज् ज्ञानेन्द्रियैर्लभ्यते,
यद् बुद्ध्यास्तु विवेचनेन जनितं ज्ञानं हि तन्मन्यताम् ।
बुद्धिश्चेत् सुपरिष्कृता तदनया सम्यग् विवेको भवेद्,
बुद्धिं यश्च परिष्करोति ददते ज्ञानं च सोऽयं गुरुः ।।2।।

शिक्षाभिः खलु बुद्धिवह्निकणिकां फूत्कृत्य फूत्कृत्य च
शिष्यं जागरितं विधाय सदसद्दृष्टिं प्रयच्छेद् गुरुः ।
सोऽयं जागरितो हि शिष्यपुरुषः सूक्ष्मेक्षिकाभिः स्वयं
सत्यासत्यविवेचनं तु कुरुते गृह्णात्यथो सत्पथम् ।।3।।

संसारे द्विविधाः स्थिता गुरुजनास्ते लौकिकाः केचन
केचिच्चात्र तु पारमार्थिकगुरुश्रेणीसमारोहिताः ।
बाहुल्येन तु लौकिका हि गुरवः सर्वत्र लभ्याः सदा
ये चान्ये परमार्थसिद्धगुरवस्ते दुर्लभाः प्रायशः ।।4।।

लोके लौकिकवृत्तशिक्षकतया तत्तद्विशेषेषु वै
ये बुद्धिं तु विकासयन्ति सुधियस्ते लौकिकाः प्रायशः।
आत्मानं तु विकासयन्ति परमब्रह्मोपदेशैस्तु ये
ते वै सद्गुरुसंज्ञयाऽत्र सुजनैः सम्मानिताः सर्वदा।।5।।

विद्यां कामपि शिक्षयन्तु गुरवः किं भौतिकीं वाऽऽत्मिकीं
ते सर्वेऽ पि तु पूजनीयपुरुषाः सम्माननीयाश्च ते।
केचित् लौकिकजीविकासु कुशलीकुर्वन्ति चेन्मानवान्
मन्ये तान् परमार्थसाधनदिशासन्दर्शने सङ्गताः।।6।।

विद्यादातृतया तु यद्यपि समं लोके गुरूणां द्वयं
किन्त्वत्रास्ति विशेषमान्यमहिमा श्रीसद्गुरुज्ञानिनाम्।
यां विद्यां ददते तु शिक्षकजनास्तन्निष्क्रयः सम्भवेद्
विद्यां यां ददते तु सद्गुरुजनास्तस्या हि नो निष्क्रयः।।7।।

नो दाता गुरुणा समो भवति वै भिक्षुश्च नो शिष्यवत्
यो लोकत्रयसम्पदां तु ददते शिष्याय वृद्धो गुरुः।
नो साधारणमानवो गुरुरहो सोऽलौकिकः पूरुषः
त्रैलोक्ये गुरुतो महान् न हि परः सोऽयं महद्भ्यो महान्।।8।।

यत्कुर्यान्ननु सद्गुरुर्न तु तथा कुर्याद् महानीश्वरः
नो दद्यात् परमेश्वरोऽपि तदहो दद्यात्तु यत् सद्गुरुः।
सेतुः स्यात् परमेश्वरं प्रति परं पारं प्रयातुं गुरुः
अर्धोऽयं परमेश्वरो यदि तदाऽर्धेनास्त्ययं मानवः।।9।।

मध्ये तिष्ठति सद्गुरुर्भगवतो भक्तस्य शिष्यस्य च
सोऽयं चोभयपक्षयोरपि समं जानाति भाषाद्वयम्।
सम्पर्कस्य हि साधकोऽयमुभयोः स्याच्चैष सन्देशवाट्
नो शिष्यो गुरुमन्तरा भगवता सम्बन्धमासादयेत्।।10।।

सर्वोच्चासनसंस्थितो हि भगवान् पूर्णप्रकाशो हि सः
जीवोऽयं पुनरन्धकारपरिखागम्भीरगर्त्तस्थितः
जीवानां नहि वेदनास्वर इयत् प्रोच्चः पदं प्राप्नुयात्।
मध्यस्थो गुरुरेव शिष्यविनयं सम्प्रेषयेत् तं प्रति ।।11।।

सामान्येन हि सद्गुरुर्यदपि वै स्यात् सर्वसाधारणः,
देहित्वान्ननु तत्र देहघटना सर्वप्रकारा अपि ।
देहेनान्यसमानतामुपगतोऽप्येष प्रकृष्टस्ततः
दीपो यद्यपि मृण्मयोऽत्र विलसद् ज्योतिस्तु नो मृण्मयम् ।।12।।

सामान्येन जनस्य जीवनपथः स्याद् यादृशो लौकिकः ।
तस्मादन्यविधैव जीवनदिशा बुद्धात्मना जायते ।
तस्मादेव तु ते सदा भगवतो ह्यंशावतारात्मना
विख्याता बहुमानिताश्च सततं साधारणैः पूरुषैः ।।13।।

अस्माकं खलु पार्श्वतः स्थिततया दृश्या इमे यद्यपि,
किन्त्वेते खलु केवलेन वपुषाऽस्माभिः समं संस्थिताः ।
आात्मैषां परमात्मना सह सदा संवादमातिष्ठते
तेषामेष विशेषमान्यमहिमा तस्माद् महान्तो हि ते ।।14।।

संसारे नहि शिक्षयन्ति तदिमे काञ्चित् कलां लौकिकीं
ते विद्यां वितरन्ति कामपि परां दिव्यां च लोकातिगाम् ।
तस्मात् सद्गुरुशिष्ययोरिह समो योगोऽस्ति नो लौकिकः ।
सम्बन्धोऽयमलौकिकोऽतिमधुरः अक्षांशुभिर्निर्मितः ।।15।।

छात्राणामथ शिक्षकस्य च मिथो भेदो गुणैर्नास्ति भो,
भेदोऽयं परिणामतः खलु तयोन्यूनाधिकत्वाङ्कितः ।
छात्राणां ननु जीवनीयविषये विज्ञानमल्पायितं
तत्तस्मिन् विषये हि शिक्षकजना जानन्ति किञ्चिद् बहु ।।16।।

स्यात् सांसारिकवस्तुबोधविषयो मात्रात्मको विस्तरः
आत्मास्तित्वविकासकस्तदितरः सोऽयं गुणात्मा भवेत्।
कामं मास्तु महात्मनो हि बहुशो ज्ञानं पदार्थात्मकं
किन्त्वेषां परमात्मसीम्नि विगतः स्यादात्मनो विस्तरः।।17।।

चैतन्येन च बुद्धितश्च विकसेत् कश्चिद् विशिष्टो जनः
चैतन्येन विकास एव तु वरो बुद्धेर्विकासाद् भवेत् ।
तस्मादेव महात्मनां समधिकं पूजा भवेत् भारते,
सम्पन्नैरपि शासकैश्च गुरवः सम्मानिताः पूजिताः ।।18।।

गोविन्दस्य समीपतां गमयितुं गृह्णाति हस्ते गुरुः,
साक्षात् श्रीहरिसन्निधिं नु स नयेत् शिष्यं सुनिष्ठं पुनः ।
इत्थं श्रीगुरुदेव एव भगवत्सन्दर्शनं कारयेत्
तस्मात् श्रीगुरवे नमो भवतु वै भूयश्च भूयो नमः ।।19।।

दूरे नैव तु तिष्ठतीह भगवान् सोऽयं तु सर्वान्तिकः
अज्ञानोपहतस्तु लोकनयनैर्नायं पुनर्दृश्यते ।
अज्ञानं गुरुदेव एव कुशलो ज्ञानाञ्जनैर्नाशयेत्
तस्मै श्री गुरवे नमोऽस्तु सुतरां बुद्धाय शुद्धाय च ।।20।।